# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ३४

युध्यतामेव तेषां तु तदा वानररक्षसाम् ।
रविरस्तं गतो रात्रिः प्रवृत्ता प्राणहारिणी ॥ १॥

अन्योन्यं बद्धवैराणां घोराणां जयमिच्छताम् ।
सम्प्रवृत्तं निशायुद्धं तदा वारणरक्षसाम् ॥ २॥

राक्षसोऽसीति हरयो हरिश्चासीति राक्षसाः ।
अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे ॥ ३॥

जहि दारय चैतीति कथं विद्रवसीति च ।
एवं सुतुमुलः शब्दस्तस्मिंस्तमसि शुश्रुवे ॥ ४॥

कालाः काञ्चनसंनाहास्तस्मिंस्तमसि राक्षसाः ।
सम्प्रादृश्यन्त शैलेन्द्रा दीप्तौषधिवना इव ॥ ५॥

तस्मिंस्तमसि दुष्पारे राक्षसाः क्रोधमूर्छिताः ।
परिपेतुर्महावेगा भक्षयन्तः प्लवङ्गमान् ॥ ६॥

ते हयान्काञ्चनापीडन्ध्वजांश्चाग्निशिखोपमान् ।
आप्लुत्य दशनैस्तीक्ष्णैर्भीमकोपा व्यदारयन् ॥ ७॥

कुञ्जरान्कुञ्जरारोहान्पताकाध्वजिनो रथान् ।
चकर्षुश्च ददंशुश्च दशनैः क्रोधमूर्छिताः ॥ ८॥

लक्ष्मणश्चापि रामश्च शरैराशीविषोमपैः ।
दृश्यादृश्यानि रक्षांसि प्रवराणि निजघ्नतुः ॥ ९॥

तुरङ्गखुरविध्वस्तं रथनेमिसमुद्धतम् ।
रुरोध कर्णनेत्राणिण्युध्यतां धरणीरजः ॥ १०॥

वर्तमाने तथा घोरे सङ्ग्रामे लोमहर्षणे ।
रुधिरोदा महावेगा नद्यस्तत्र प्रसुस्रुवुः ॥ ११॥

ततो भेरीमृदङ्गानां पणवानां च निस्वनः ।
शङ्खवेणुस्वनोन्मिश्रः सम्बभूवाद्भुतोपमः ॥ १२॥

हतानां स्तनमानानां राक्षसानां च निस्वनः ।
शस्त्राणां वानराणां च सम्बभूवातिदारुणः ॥ १३॥

शस्त्रपुष्पोपहारा च तत्रासीद्युद्धमेदिनी ।
दुर्ज्ञेया दुर्निवेशा च शोणितास्रवकर्दमा ॥ १४॥

सा बभूव निशा घोरा हरिराक्षसहारिणी ।
कालरात्रीव भूतानां सर्वेषां दुरतिक्रमा ॥ १५॥

ततस्ते राक्षसास्तत्र तस्मिंस्तमसि दारुणे ।
राममेवाभ्यधावन्त संहृष्टा शरवृष्टिभिः ॥ १६॥

तेषामापततां शब्दः क्रुद्धानामभिगर्जताम् ।
उद्वर्त इव सप्तानां समुद्राणामभूत्स्वनः ॥ १७॥

तेषां रामः शरैः षड्भिः षड्जघान निशाचरान् ।
निमेषान्तरमात्रेण शितैरग्निशिखोपमैः ॥ १८॥

यज्ञशत्रुश्च दुर्धर्षो महापार्श्वमहोदरौ ।
वज्रदंष्ट्रो महाकायस्तौ चोभौ शुकसारणौ ॥ १९॥

ते तु रामेण बाणौघः सर्वमर्मसु ताडिताः ।
युद्धादपसृतास्तत्र सावशेषायुषोऽभवन् ॥ २०॥

ततः काञ्चनचित्राङ्गैः शरैरग्निशिखोपमैः ।
दिशश्चकार विमलाः प्रदिशश्च महाबलः ॥ २१॥

ये त्वन्ये राक्षसा वीरा रामस्याभिमुखे स्थिताः ।
तेऽपि नष्टाः समासाद्य पतङ्गा इव पावकम् ॥ २२॥

सुवर्णपुङ्खैर्विशिखैः सम्पतद्भिः सहस्रशः ।
बभूव रजनी चित्रा खद्योतैरिव शारदी ॥ २३॥

राक्षसानां च निनदैर्हरीणां चापि गर्जितैः ।
सा बभूव निशा घोरा भूयो घोरतरा तदा ॥ २४॥

तेन शब्देन महता प्रवृद्धेन समन्ततः ।
त्रिकूटः कन्दराकीर्णः प्रव्याहरदिवाचलः ॥ २५॥

गोलाङ्गूला महाकायास्तमसा तुल्यवर्चसः ।

सम्परिष्वज्य बाहुभ्यां भक्षयन्नजनीचरान् ॥ २६ ॥

अङ्गदस्तु रणे शत्रुं निहन्तुं समुपस्थितः ।
रावणेर्निजघानाशु सारथिं च हयानपि ॥ २७ ॥

इन्द्रजित्तु रथं त्यक्त्वा हताश्वो हतसारथिः ।
अङ्गदेन महामायस्तत्रैवान्तरधीयत ॥ २८ ॥

सोऽन्तर्धान गतः पापो रावणी रणकर्कशः ।
ब्रह्मदत्तवरो वीरो रावणिः क्रोधमूर्छितः ।
अदृश्यो निशितान्बाणान्मुमोचाशनिवर्चसः ॥ २९ ॥

स रामं लक्ष्मणं चैव घोरैर्नागमयैः शरैः ।
बिभेद समरे क्रुद्धः सर्वगात्रेषु राक्षसः ॥ ३० ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com